शोधयेत् पूर्व्वमद्‌नु यावन्नोत्तरदर्शनं" ॥

स्वभावोक्तं अकृत्रिमं। इति व्यवहारतत्त्वं ॥ (अक्रियोत्पन्नः। नैसर्गिकः। अयत्नकृतः। यथा,—

"तदकृत्रिमसौहार्द्दमापत्स्वपि न मुञ्चति"। इति हितोपदेशः।)

अकृपः, त्रि, (नास्ति कृपा यस्य सः।) कृपाशून्यः। निर्द्दयः। अकरुणः। यथा,—

"वनजौ वनजौ कृच्छ्रस्थिरामी सकृपोऽकृपः"। इत्यनुष्टुबाचार्य्यः ॥

अकृपणः, त्रि, (न कृपणः। नञ्समासः।) कार्पण्यरहितः। दीनताशून्यः। यथा,—

"महता व्यसनं प्राप्तो दीनः कृपण उच्यते। कुलेऽप्यकृपणो राम संभूतः सर्वकामदे" ॥

इति रामायणं। (पुष्कलः। बहुलः। यथा,—

"भुग्यां नवपल्लवैरकृपणैस्तिष्ठ यामो वयम्"। इति वैराग्यशतके।

अकृष्णकर्म्मा, [न्] त्रि, (न कृष्णं मलिनं कर्म्म यस्य सः। न+कृष्ण+कर्म्मन्।) दुष्कर्म्मरहितः। निष्पापः। शुद्धाचारः। अकृष्णं निष्पापत्वात् शुक्लं कर्म्मास्य। इत्यमरटीकायां भरतः ॥

अकेशः, त्रि, (नास्ति केशो यस्य। अल्पः अप्रशस्तो वा केशो यस्य सः।) केशरहितः। अल्पकेशयुक्तः अप्रशस्तकेशविशिष्टः ॥

अकैतवं, क्ली, (न कैतवम्। नञ्समासः।) कैतवाभावः। अकपटता। अधूर्त्तता। अवञ्चना ॥

अकोटः, पुं, (न+कुट+भावे घञ्।) गुवाकः। इति त्रिकाण्डशेषः ॥

अकोविदः, त्रि, (न कोविदः। नञ्समासः।) अपण्डितः। मूर्खः ॥

अकौटिल्यं, क्ली, (न+कौटिल्यं। नञ् समासः।) कौटिल्याभावः। सरलता ॥

अक्का, स्त्री, (अकं दुःखं कायति शब्दायति इति कै शब्दे।) माता। इति शब्दरत्नावली ॥

अक्तः, त्रि, (अञ्चेर्गतौ क्तः। अक्तपरिमाणस्य वाचक इति भाष्यस्य कैयटेन तथा व्याख्यातत्वात्। अनक्ति अज्यते वा। अञ्जू व्यक्त्यादौ। अञ्जिघृसिभ्यः क्तः इति औणादिकः क्तः।) युक्तः ॥ गतः ॥ व्यक्तः ॥ अनज व्यक्तिगतिम्रक्षणे इत्यस्मात् कर्म्मणि क्तः। यथा,—

"हिक्काश्वासातुरे पूर्व्वं तैलाक्ते स्वेद इष्यते"। इति चक्रदत्तः। (स्त्रियां अक्ता इति पदं रात्रिवाचकम् वेदे प्रसिद्धम्।)

अक्तुः, स्त्री, रात्रिः। अनक्ति प्रतिदिनं गच्छति अक्तुः। अञ्जू धनि व्यक्तिगतिम्रक्षणे बाहुलकात् कुः अनिदितामिति नलोपः। वेदप्रचुरप्रयोगोऽयं। (आयुधं। किरणः। कान्तिः। नक्षत्रं। स्रोतः। अञ्जनघृतं। एते अर्थाः वैदिकग्रन्थे प्रसिद्धाः।)

अक्रव्यादः, त्रि, (न क्रव्यादः। नञ्समासः।) अमांसभक्षकः। यथा,—

"क्रव्यादांस्तु मृगान् हत्वा धेनुं दद्यात् पयस्विनीं। अक्रव्यादान् वत्सतरीमुष्ट्रं हत्वा तु कृष्णलं" ॥

इति मानवे ११ अध्याये १३३ श्लोकः ॥

अक्रमः, त्रि, (न क्रमः। नञ् समासः। नास्ति क्रमो यस्य इति वा।) क्रमरहितः। व्यतिक्रमः। यथा,—

"अक्रमाच्छेफसो वृद्धिं योऽभिवाञ्छति मूढधीः"। इति माधवकरः ॥ (क्रमाभावः। क्रमविपर्य्ययः। यथा,—'इदमनुचितमक्रमश्च पुंसां यदिह जरास्वपि मान्मथा विकाराः' इति शृङ्गारशतकम्।)

अक्रान्ता, स्त्री, (न+क्रम्+क्त+आप्।) वृहती। इति काचिद्रत्नमाला ॥ अनाक्रान्ते त्रि ॥

अक्रियः, त्रि, (नास्ति क्रिया यस्य। अप्रशस्ता वा क्रिया यस्य।) अक्रियान्वितः। कुकर्म्मविशिष्टः। क्रियारहितः। यथा 'अक्रियत्वाच्च सर्व्वदा'। इति चरकः ॥ (निश्चेष्टः। स्पन्दरहितः। कर्म्मत्यागी। यथा,—

"अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः। स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः" ॥

इति गीतायाम्।) (स्त्री। क्रियाभावः। क्रियात्यागः। अयथाक्रिया। यथा,—

"अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः सर्वकर्म्मिणाम्। अक्रिया च परोक्ता च तृतीया चायथाक्रिया" ॥

इति कात्यायनसङ्कलितः।)

अक्रूरः, पुं, (क्रौर्य्यवान् क्रूरः, स न भवति इति अक्रूरः। यद्वा क्रूर इति भावप्रधानो निर्द्देशः। न विद्यते क्रौर्य्यम् इति अक्रूरः।) गान्दिनीपुत्रः। श्रीकृष्णपितृव्यः। तस्य पिता श्वफल्कः। (तस्य माता गान्दिनी।) इति श्रीभागवतं ॥ क्रूरताशून्ये त्रि ॥ (सरले। यथा,—

"स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोरमम्"। इति मनुः। पुंसि विष्णुः। यथा,—

"अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः"। इति भारते।)

अक्रोधः, पुं, (न क्रोध इति नञ् समासः। नास्ति क्रोधो यस्य इति वा।) क्रोधश्चित्तविकारः तद्विपरीतः। स तु आश्रमिणां दशधर्म्मान्तर्गतधर्म्मः। इति जटाधरः ॥ (यथाह मनुः—

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्" ॥

इति।) वाच्यलिङ्गस्तु क्रोधरहितवाची ॥

अक्लान्तः, त्रि, (न+क्लम्+क्त। न क्लान्त इति नञ्समासः।) क्लान्तिरहितः। अनवसन्नः। अम्लानः ॥

अक्लिका, स्त्री, नीलीवृक्षः। इति शब्दचन्द्रिका ॥

अक्लिष्टकर्म्मा, [न्] त्रि, (अक्लिष्टम् अनायाससाध्यं कर्म्म यस्य। बहुव्रीहिः।) अक्लेशेन कर्म्मकर्त्ता। यथा,—

"दूतोऽहं कोशलेन्द्रस्य रामस्याक्लिष्टकर्म्मणः"। इति रामायणं।

अक्लेशं, क्ली, (न क्लेश इति नञ् समासः।) क्लेशाभावः। यथा,—

"यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्म्मभिरगर्हितैः। अक्लेशेन शरीरस्य कुर्व्वीत धनसञ्चयं" ॥

इति मानवे ४ अध्याये ३ श्लोकः ॥ क्लेशाभाववति त्रि ॥

अक्लेशः, त्रि, (नास्ति क्लेशो यस्य इति बहुव्रीहिः।) क्लेशशून्यः। अनायासः। अकष्टः ॥

अक्ष, न ऊ व्याप्तौ। संहतौ। इति कविकल्पद्रुमः। न अक्ष्णोति धनं लोकः। व्याप्नोति राशीकरोति वा इत्यर्थः। ऊ आक्षिष्टां। आष्टां। इति दुर्गादासः।

अक्ष, ऊ व्याप्तौ। संहतौ। इति कविकल्पद्रुमः। अक्षति धनं लोकः। व्याप्नोति राशीकरोति वा इत्यर्थः। ऊ आक्षिष्टां। आष्टां। इति दुर्गादासः ॥

अक्षं, क्ली, (अक्ष्णोति अक्षति वा अश्नुते वा अनेन अत्र वा अक्षू व्याप्तौ। पचाद्यच् घञ् वा। अश्नुते व्यर्थं अशू व्याप्तौ। अशेर्देवने इति सो वा।) इन्द्रियं। (यथा विष्णुपुराणे,—

"शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित्। कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायणः" ॥)

सौवर्च्चलं। तुत्थं। इति मेदिनी। (चक्षुः। यथा रामायणे,—

"सर्व्वे तेऽनिमिषैरक्षैस्तमनुद्रुतचेतसः"। इति।)

अक्षः, पुं, कर्षपरिमाणं। (यथा,—

"ते षोड़शाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयं"।)

पाशकः। (अक्षैर्दीव्यन् वा दीव्यति। इति सिद्धान्तकौमुदी।) (पाशक्रीड़ा। यथाह मनुः)—

'मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः'।)

कलिद्रुमः। इत्यमरः। (विभीतकवृक्षः। यथा छान्दोग्ये—यथा वै द्वे आमलके द्वे कोले द्वौ वाक्षौ मुष्टिरनुभवति।) ज्ञातार्थः। शकटः। व्यवहारः। रुद्राक्षः। इन्द्राक्षः। सर्पः। चक्रं। इति मेदिनी। (चक्रधारणदारुभेदः। यथा,—

"छिन्नास्ते भग्नयुगे तिर्य्यक् प्रतिमुखागते। अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च" ॥)

आत्मा। रावणपुत्रः। इति हेमचन्द्रः। (यथा रामायणे—'निशम्य राजा समरे सहोत्सुकं कुमारमक्षं प्रसमैक्षताग्र वै'।)

जातान्धः। गरुड़ः। इति शब्दरत्नावली। (शिवः। यथा भारते—

"अक्षश्च रथयोगी च सर्व्वयोगी महाबलः"। इति) संस्कृतपलभा। यथा,—

"चन्द्राश्विनिघ्ना पलभाहिता च लङ्कावधिः स्यादिह दक्षिणोऽक्षः"। इति भास्वती ॥

"प्रभा शरघ्ना स्वतुरीययोगा- दक्षः सदा दक्षिणदिक् प्रदिष्टः"। इति जातकार्णवः—

"दक्षिणोत्तररेखायां सा तत्र विषुवत् प्रभा। शङ्कुच्छाया हते त्रिज्ये विषुवत् कर्णभाजिते ॥ लम्बाक्षज्ये तयोश्चापे लम्बाक्षौ दक्षिणौ सदा"। इति सूर्य्यसिद्धान्तः ॥

अक्षकः, पुं, (अक्ष+क) तिनिशवृक्षः। इति रत्नमाला।